# Shri Bhaktivaijayanti Stotram

# શ્રીભક્તિવૈજયન્તીસ્તોત્રમ્

## Document Information

Text title : Shri Bhaktivaijayanti Stotram 06 15

File name : bhaktivaijayantIstotram.itx

Category : vishhnu, stotra, krishna

Location : doc_vishhnu

Author : jIvadevAchArya

Proofread by : Gopalakrishnan

Description/comments : From stotrArNavaH 06-15

Source : jIvadevAchArya

Latest update : September 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 28, 2023

*sanskritdocuments.org*

# શ્રીભક્તિવૈજયન્તીસ્તોત્રમ્

શ્રીકૃષ્ણાય નમઃ સમસ્તહૃદયામ્ભોજાવદાતત્વિષે
ભક્તૌઘસ્મયમાનમાનસવતે દૈત્યાવલીવિદ્વિષે ।
ગોપીવલ્લવિકાય નાયકગુણગ્રામપ્રણાલીજુષે
લીલાવૈણવિકાય કાયસુષમાનીલામ્બુજશ્રીજુષે ॥ ૧॥

અવ્યક્તં શ્રુતિશેખરાન્તરવને વ્યક્તં ચ વૃન્દાવને
ગૂઢં વેદવિચારચારુવદનૈગૂઢં ચ ગોપીજનૈઃ ।
અસ્પષ્ટં હૃદિ યોગિનામપિઃ પુનઃ સ્પષ્ટં ચ સેવાવતાં
શ્રીકૃષ્ણં કમનીયકાન્તિકુહકં બ્રહ્માદ્ભુતં સંશ્રયે ॥ ૨॥

પદ્માપીનપયોધરપ્રણિહિતં પ્રાણપ્રદં પ્રાણિનાં
પિજગ્છાડમ્બરપીવરં પ્રણાયિનીપ્રેમાપ્રિયં ભાવુકમ્ ।
પીતં પદ્મવિલોચનાપરિષદા પ્રત્યક્ષતઃ પ્રીતયા
પાયાદ્વઃ પ્રતિમાભિનાપિહિતં પીતામ્બરં પ્રાભવમ્ ॥ ૩॥

કાલો ગત્વર એષ કેનચિદહો માર્ગેણ યાસ્યત્યલં
યોગક્ષેમવિચારઘોરનરકે રાત્રિન્દિવં મન્જતામ્ ।
યેષાં યાતિ મુકુન્દચિત્રચરિતશ્રેયોऽમૃતાકર્ણન-
પ્રેયોનન્દિતચેતસાં સુમનસાં તેભ્યો મહદ્ભયો નમઃ ॥ ૪॥

બાહ્વોરઙ્કિતશઙ્ખચક્રયુગલં કણ્ઠે તુલસ્યાઞ્ચિતં
સ્વાન્તે પ્રસ્ફુટકૃષ્ણપાદકમલં નામામૃતાઢ્યં મુખે ।
નેત્રે હર્ષજલોજ્જ્વલં શુચિતરે ગાત્રે ચ રોમાઞ્ચિતમ્ ।
ધન્યા એવ વિલોકયન્તિ નયનૈર્વિષ્ણોઃ સમં વૈષ્ણવમ્ ॥ ૫॥

સત્યં જ્ઞાનમનન્તમેકમમલં જ્યોતિઃ સ્વતો ભાસ્વરં
બ્રહ્માનન્દઘનં પરં ગુરુમુખાદ્વિજ્ઞાય વેદાન્તતઃ ।
સદ્યઃ સ્મેરસરોજસુન્દરતરં લક્ષ્મ્યા મુદોપાસિતં
તદ્વિષ્ણોઃ પરમં પદં હૃદિ સદા પશ્યન્તિ યત્સૂરયઃ ॥ ૬॥

અવ્યક્તં પરમં નિરાકૃતિ હરે રૂપં વચશ્ચેતસોઃ-
દૂરં કેવલચિત્પ્રકાશમતુલં જ્ઞાત્વા શ્રુતેઃ શેખરે ।
વ્યક્તં વિસ્તૃતપુણ્ડરીકનયનં વંશીનિનાદપ્રિયં
વૃન્દારણ્યવિનોદવઞ્ચનપરં સંસેવ્યતાં મુક્તયે ॥ ૭॥

આર્દ્રાન્તઃકરણં ગુણૈર્ભગવતસ્ત્યક્તાન્યમાર્ગભ્રમં
રોમાઞ્ચૈર્વિપુલૈઃ સમાવૃતતનું હર્ષાશ્રુપૂર્ણક્ષણમ્ ।
આનન્દોદયમોદમાનમનિશં શ્રીકૃષ્ણનામામૃતૈઃ
મુક્તિઃ સન્તનુતે સ્વયંવરવિધિં દૃષ્ટ્વા સ્વયં વૈષ્ણવમ્ ॥ ૮॥

ધિગ્જિહ્વાં પિશુનસ્ય કૃત્તમુસલીપુચ્છોપમં વિહ્વલાં
દુસ્તર્કોપલતાડનૈર્ભગવતો ભક્તેર્દ્વિષાણાં મૃષા ।
કૈવલ્યાગમકર્તરીં કલિપટીનિર્માણકાલે તુરીં
મર્મોદ્ભેદનસૂચિકાં નિજહતેઃ સંસૂચિકાં સૂચિકામ્ ॥ ૯॥

ભેદોઽયં યાદ નામ જીવપરયોઃ સ્વાભાવિકો વર્તતે
યદ્વૌપાધિક એવ મૂર્તિપદવીપર્યન્તમત્ર ધ્રુવઃ ।
તત્રૈવં સતિ સેવ્યસેવકભિદા સિધ્દ્ધા પ્રસિધ્દ્ધા શ્રુતૌ
નિષ્કામો નિજમુક્તયે પરમુપાસીતેતિ વાક્યૈઃ સ્ફુટમ્ ॥ ૧૦॥

એકે ષોડશષટ્પદાર્થવિષયજ્ઞાનં સમાચક્ષતે
કર્મૈવેતિ વિચારયન્તિ કતિચિદ્યોગં ચ કેચિજ્જગુઃ ।
પુંસોઽથ પ્રકૃતેશ્ચ જીવપરયોર્જ્ઞાનં પરે મેનિરે
સર્વં ક્લૃપ્તમિદં ગુણૈર્ભગવતો ભક્તિઃ પરં મુક્તયે ॥ ૧૧॥

યા કાચિત્ પરિકલ્પિતા ખલકથા તામાગપ્યજાતભ્રમાઃ
પાકાયાતિભયઙ્કરાય વિરસાકારાય લબ્ધાશ્રમાઃ ।
નાકાધીશપતેરપારપરમાનન્દાપ્તિમન્દાકિનીં
શાકાસ્વાદપરાઃ સુધામિવ સુધા નેચ્છન્તિ ભક્તિં બુધાઃ ॥ ૧૨॥

કં કઃ સેવત ઇત્યુદીરયતિ યોઽભેદે સ કઙ્કઃ સ્વયમ્ ।
કા કા ભક્તિરિતીરયન્તિ બહુ યે કાકા વરાકા હિ તે ।
બ્રહ્માહં વિષમેઽત્ર મે કૃતશમે કિં મે ભવેદીશ્વરઃ
સેવ્યોઽસાવિતિ સંલપન્નુરુગલઃ સોઽયં ખલશ્છાગલઃ ॥ ૧૩॥

સ્વાધ્યાયાધ્યયને તથોપનિષદાં જાતેઽક્ષરાણાં ગ્રહે

વિજ્ઞાતે શ્રવણે ચ જીવપરયોરૈક્યે વિમુક્તેક્ષણઃ ।
શ્રીકૃષ્ણં ભજમાન એવ બહુધા સઙ્કીર્તનાદ્યૈઃ સદા
સત્યં જ્ઞાનમનન્તમેકમખિલં તદ્બ્રહ્મ સમ્પદ્યતે ॥ ૧૪॥

એતૈઃ ષોડશભિઃ પદાર્થનિચયૈર્જ્ઞાતૈર્વિમુક્તિઃ કથં
જલ્પંસ્તત્ર ફલં પરસ્ય વિજયઃ સ્યાત્તેન કિં વા તતઃ ।
જ્ઞાનં ચેત પરમેશ્વરસ્ય તદિદં ભક્ત્યર્થમેવોચિતં
સિદ્ધાન્તેષ્વિદમૂચિરે સ્ફુટતરં પ્રામાણિકાસ્તાર્કિકાઃ ॥ ૧૫॥

દ્રવ્યાદૌ વિદિતે પદાર્થનિવહે કૈવલ્યસિદ્ધિઃ કથં
પાણિન્યાદિવિવેચનાદિવ સુખં જ્ઞાતા ભવેત્ પ્રક્રિયા ।
શબ્દસ્યાપ્યનુમાનભાવભજનં બૌદ્ધસ્ય પન્થા ન કિં
તસ્માદીશમુપાસિતું શ્રુતમિદં દ્રવ્યાદિચિન્તાફલમ્ ॥ ૧૬॥

બ્રૂતે ષોડશષટ્પદાર્થકલનાત્ કા વા વિમુક્તિં શ્રુતિઃ
કિં વા સંસ્મરણં પુરાણવચનં ન્યાયોઽપિ કસ્તાદૃશઃ ।
તર્કો વેદવિચારણાય ઘટિતેઽનુગ્રાહકઃ કેવલં
તસ્યૈ તત્પ્રતિપક્ષતા યદિ તદા સિદ્ધા ન કિં બૌદ્ધતા ॥ ૧૭॥

ભેદોઽયં ઘટકુમ્ભયોઃ સમુચિતં પ્રત્યક્ષતો ગૃહ્યતે
શ્રુત્યા કેવલમેવ જીવપરયોઃ કૈવલ્યમુદ્ભાવ્યતે ।
ભેદાભેદવિવેચને પ્રભવતિ પ્રત્યક્ષયોવાસ્પદે
તસ્યાગોચરકે કથં પ્રસરતુ ભ્રાન્તેઽપિ તુલ્યોદયમ્ ॥ ૧૮॥

ભેદં લોકનિતં વદિષ્યતિ કથં પશ્ચાદભેદશ્રુતિઃ
ભીતા લોકમિતેર્ભવિષ્યતિ પુનઃ સ્વાર્થીપચારે કથમ્ ।
બાધં લૌકિકમાનતઃ કથમિયં ગચ્છેદથાપૌરુષી ।
યદ્યેષા પુરષોદિતા સ પુરુષઃ કિં ત્વાદૃશોઽન્યાદૃશઃ ॥ ૧૯॥

યસ્મિન્ સર્વમિદં વિભાતિ નિહિતં યસ્માત્ પુનર્જાયતે
યસ્મિન્નેવ લયં પ્રયાતિ સકલં કર્માપિ યત્પ્રીતયે ।
સર્વં કર્મફલં વિમુક્તિપદવી યસ્ય પ્રસાદાદ્ભવેત્
યચ્છ્વાસપ્રતિમા શ્રુતિઃ સ ભગવાન્ કૈશ્ચિત્ કથં નેષ્યતે ॥ ૨૦॥

દ્રોહં શ્રીપરમેશ્વરે વિદ્ધતે યે લૌકિકૈઃ કલ્પનૈઃ
વેદાન્તૈરુપગીયમાનચરિતે ન્યાયૈશ્ચ સંસવિતે ।
તે વ્યર્થં પશુમારણૈકરસિકાઃ સન્માર્ગસન્દૂષકાઃ-

કન્થાં કર્મમયીં નિધાય નિભૃતા મીમાંસકા રાક્ષસાઃ ॥ ૨૧॥

કર્મૈવ પ્રતિપાદ્યતાં સ્વસમયૈર્ન્યાયૈઃ સહસ્રૈઃ સ્ફુટં
તસ્યાનુષ્ઠિતિસિદ્ધયે ક્રમવતી વ્યાખ્યાયતાં પદ્ધતિઃ ।
જાને યૂયમિહાત્મનાશરસિકા મીમાંસકા હિંસકાઃ
યદ્દ્રોહાત્ પરમેશ્વરસ્ય ભવતાં સ્વર્ગોઽપવર્ગો હતઃ ॥ ૨૨॥

મોહોઽયં કપિલસ્ય જૈમિનિમુનેર્દ્રોહોઽયમીશે પરે
તદ્ભુક્તિં કણભુક્ તથાક્ષચરણસ્તર્કેણ ચક્રે પરામ્ ।
વ્યાસઃ કૃષ્ણમતાનુસારિ કૃતવાન્ સૂત્રં નિરસ્તભ્રમઃ
કૃષ્ણોપાસનયા સમાધિવિભવઃ પાતઞ્જલેઃ પ્રક્રમઃ ॥ ૨૩॥

સ્વર્ગો દુર્ગતિમાગતોઽક્ષયમુખો મોક્ષોઽપિ વિક્ષોભિતઃ
સ્વેચ્છાકલ્પનયાનયા રચનયા વેદોઽપિ વિપ્લાવિતઃ ।
મોક્ષાર્થં મિલતાં સુમુધામતિમતાં સાઙ્ખ્યેન સઙ્ખ્યાવતાં
દ્વેષાર્થઃ પરમેશ્વરસ્ય નિતરાં લાભો મહાગૌરવઃ ॥ ૨૪॥

વેદાનીશ્વરસેવનવ્યસનિનો મુક્ત્વા તદેકવ્રતાન્
વિદ્યાભાવનયાલ્પયા પ્રકટયં તાં પલ્લવગ્રાહિણીમ્ ।
નારત્યેવેશ્વર ઇત્યુદીરયતિ યઃ સૂત્રેણ બદ્ધો ગલે
નાશાયૈવ કૃતોદ્યમઃ સ હિ પશુઃ કાલસ્ય નૂનં બલિઃ ॥ ૨૫॥

ઈશદ્રોહપરાયણં મતભિદં નૈવોજ્જ્વલં કાપિલં
ગ્રાહ્યં જૈમિનિકલ્પિતં ભગવતો દ્રોહાદૃતે કર્મતામ્ ।
નાસ્ત્યેવેશ્વર ઇત્યુદીરણપરો દ્રોહં વિષં દોગ્ધિ ગામ્ ।
તત્ પીત્વા નિપતત્યપારનિરયે ભૂયો વિનષ્ટસ્મૃતિઃ ॥ ૨૬॥

ન્યાયા યાન્તુ વિદૂરમેવ ભવતાં ભક્તૌ કૃતઘ્નો યદા
મીમાંસે બહિરાસ્વ ભક્તિવચને યદ્યર્થવાદાધ્વની ।
વેદાન્તાઃ સુતરાં ન દાન્તહૃદયા ભક્તેર્ન શેષા યદા
ભક્ત્યર્થા યદિ વો નમઃ સમુચિતે માર્ગે સુખં સ્થીયતામ્ ॥ ૨૭॥

ભેદાક્રન્દનવાવદૂકરસનસ્તર્કેણ તર્કેણ કિં
તત્તદ્વેદકથાવિમર્દકુહનાસાઙ્ખ્યેન સાઙ્ખ્યેન કિમ્ ।
સ્વાન્તાશ્રાન્તનિરોધયોધકલનોદ્યોગેન યોગેન કિં
ભક્તિં ભાગવતીં શ્રયન્તુ સુધિયઃ સ્વર્ગાપવર્ગપ્રદામ્ ॥ ૨૮॥

યદ્વેદાઃ સમુદીરયન્તિ બહુધા સ્વેષાં ચ તજ્જન્યતાં
    સ્વેનૈવ પ્રતિપાદયન્તિ નિયતાં તચ્છેષતાં કર્મણામ્ ।
એષામર્પણમેવ યત્ર નિયતં મોક્ષાય સઞ્જાયતે
    તસ્યાભાવમુદીરયન્ વિજયતે સ સ્યાત્ કથં વૈદિકઃ ॥ ૨૯ ॥

લબ્ધ્વા માનુષજન્મ પૂર્વસુકૃતૈઃ પુણ્યાં ચ મેધાવિતાં
    તત્તજ્જાતિનિજાશ્રમસ્થિતિમિમાં શ્રીવૈષ્ણવૈઃ સઙ્ગથામ ।
શોચ્યા યૂયમમી ભવિષ્યથ તદા જ્ઞાનં શ્રિતા દુર્લભં
    મુક્તમ્મન્યતયા યદા ભગવતો ભક્તિઃ પરિત્યજ્યતે ॥ ૩૦ ॥

યૂયં તત્ત્વવિદઃ શ્રુતિસ્મૃતિગિરાં જ્ઞાનેન ધૌતાશયાઃ
    મુક્ત્યૈ ભાગવતી પરં ભગવતી ભક્તિઃ સમાશ્રીયતામ્ ।
સંસારામ્બુધિપારમાપ્તુમનસો ધૃત્વૈવ વો મજ્જયન્
    ધીરાઃ કોઽપિ દુરાગ્રહો હિ ભવતાં ગ્રાહો ભવિષ્યત્યયમ્ ॥ ૩૧ ॥

જ્ઞાનં સ્ત્યાનમિદં કુરુધ્વમમલૈઃ શ્રીવિષ્ણુભક્તે રસૈઃ
    કર્માણિ પ્રતિકર્મનર્મસુભગં ભક્ત્યા તનુધ્વં હરેઃ ।
યોગં ભોગસમાશ્રિતં ભગવતો રૂપૈઃ શ્રયધ્વં સદા
    ભક્તેઃ શેષતયા વિધાય સકલં ધીરાઃ સમાધ્વં સુખમ્ ॥ ૩૨ ॥

યોગો રોગ ઇવેહ દુર્લભતરઃ ખેદાય સઞ્જાયતે
    જ્ઞાનં ગ્લાનિમિદં પ્રયાતિ નિતરાં યત્નેન સમ્પાદિતમ્ ।
મર્મચ્છેદનમેવ કર્મ કલિતં ક્લેશાય સઞ્જાયતે
    વિષ્ણોભક્તિરિયં યદા ન ભવતાં મુક્તિઃ પ્રિયમ્ભાવુકી ॥ ૩૩ ॥

બેદાન્તાધ્યયનાદતઃ પ્રકૃતતા તસ્યોચિતા વૃત્તતા
    તસ્યાનન્તરતાથ શબ્દઘટિતા તત્રાધિકારીદૃશઃ ।
તેન બ્રહ્મણિ વેદમાતૃવિદિતે જ્ઞાતું વિશેષેણ તત્-
    કાર્યેચ્છેત્યનુવક્તિ વેદવચનં સૂત્રં ચ વૈયાસિકમ્ ॥ ૩૪ ॥

જન્માદ્યસ્ય યતો ભવેત્ સ ભગવાન્ બ્રહ્મેતિ વેદોદિતં
    સૂત્રેણાનુકૃતં તતોઽસ્ય જગતાં નિર્માતૃતા લક્ષણમ્ ।
તત્સામાન્યવિશેષતઃ શ્રવણતો જ્ઞાત્વા વિશુદ્ધાશયઃ
    તસ્યોપાસનમાચરેદવિરતં મુક્ત્યૈ નિરસ્તૈષણઃ ॥ ૩૫ ॥

વિશ્વં વિશ્વકૃતા કૃતં પુનરિદં તસ્યૈવ માયા સ્ફુટં
    સા તદ્ભક્તિવિશેષતો યદિ નિવર્તેતેતિ વેદોદિતમ્ ।

ઉત્સૂત્રઃ શ્રુતિલક્ષણેન રહિતસ્તત્કલ્પનાનિષ્ફલઃ
શાસ્ત્રારમ્ભસમર્થનાય વિકલોઽધ્યાસઃ કથં વર્તતે ॥ ૩૬॥

ઈશાદ્વિશ્વમિતીરણં શ્રુતિગિરાં તેન પ્રકારેણ તત્
જ્ઞાત્વોપાસનમામનન્તિ વિદુષઃ કૈવલ્યસંસિદ્ધયે ।
અધ્યસ્તં પરમેશ્વરે જગદિદં નૈતાદૃશો દૃશ્યતે
વેદઃ કોઽપિ વૃથૈવ જલ્પનમિદં કૈશ્ચિદ્બલાત્ કલ્પિતમ્ ॥ ૩૭॥

ભ્રાન્તિશ્ચેત્ પરમેશ્વરસ્ય વિહતા સર્વજ્ઞતા તદ્ગતા
જીવસ્યેતિ યદા સ એવ કથમન્યોઽન્યાશ્રયાજ્જીયતામ્ ।
તત્રાનાદિતયા યદા પરિહૃતિર્જન્માન્તરીયં સ્મરન્
કિં સર્વં કથમુલ્લસેદનુભવો નૈતાદૃશો વિભ્રમઃ ॥ ૩૮॥

અજ્ઞાતે યદિ રઙ્ગસીસશકલે જાયેત રૂપ્યભ્રમઃ-
તસ્યાભાવવિનિશ્ચિતેઃ સ ન ભવેત્ કાધિષ્ઠિતેતિતા ।
તજ્જ્ઞાનં યદિ પૂર્વમિષ્ટમમલબ્રહ્માત્મનાધિષ્ઠિતેઃ
સંસારભ્રમ ઈદૃશઃ કિમુદયે કસ્માત્ પુનર્લીયતામ્ ॥ ૩૯॥

યત્રેદં રજતં વિભાતિ નિહિતં જ્ઞાતં પુરા કિં તતો
બાધે તદ્વ્યતિરેક એવ રજતં નેદં ભવેદિત્યતઃ ।
તત્તત્વપ્રથનં નિવર્તયતિ ન ભ્રાન્તિં તતસ્તેન કિં
ન જ્ઞાનેન નિવર્તયેત્ ક્ષતરુજઃ શઙ્ખસ્મૃતેઃ પીતિમા ॥ ૪૦॥

અજ્ઞાનાદ્યદિ જીવતા કથમિદં સર્વેશ્વરો જાયતાં
જીવે ચેન્નિતરાં પરસ્પરહતં માયા તતઃ શ્રીહરેઃ ।
ઝાનાભાવનિવર્તકં તત ઇદં જ્ઞાનં મતં જ્ઞાનિનાં
માયાસન્તરણે પરં ભગવતો ભક્તેઃ શ્રુતૌ શ્રૂયતે ॥ ૪૧॥

યેયં નાશ્રયમોહિની પરવશા કર્તુશ્ચ માયા હે સા-
યાસાવાશ્રયમોહિની નિગદિતા વિદ્યા ન કર્તુર્વશા ।
સા જ્ઞાનેન નિવર્તતે ભગવતી માયા પુનર્વૈષ્ણવી
ભક્ત્યૈવેહ વિલીયતે ભગવતો લીલાકૃતેઃ શ્રીપતેઃ ॥ ૪૨॥

સ્વેનાધ્યસ્તમિદં જગદ્ભગવતા સ્વસ્મિન્ યદેતીયતે
કા યુક્તિઃ શ્રુતિરેવ કા ન સકલજ્ઞાનસ્ય યુક્તો ભ્રમઃ ।
ઈશાજાતમિદં સમસ્તમિતિ ચેત્ સૂત્રં શ્રુતિઃ શ્રૂયતે
બુદ્ધેર્બન્ધનમેવ કૈશ્ચિદુદિતાધ્યાસે વૃથા ફક્કિકા ॥ ૪૩॥

સર્વજ્ઞસ્ય કુતો ભ્રમઃ કથમસૌ જીવો નુ ભૂયઃ સ્મરેત્
  અધ્યસ્યેદિહ યદ્ભવેન વિદિતેઽધ્યાસઃ કથં જાયતામ્ ।
નૈવાધિષ્ઠિતિનિશ્ચયાદ્વિઘટતેઽધ્યાસો યથા પીતિમા
  શઙ્કે રોગશમાત્ પરં ન ખલુ તજ્જ્ઞાનં ભવેન્નિશ્ચિતમ્ ॥ ૪૪॥

અજ્ઞાતેઽપિ પુરેહ શુક્તિશકલે રૂપ્યાનુભૂતિસ્મૃતેઃ
  તત્ત્વાતિભ્રમબાધનં ચ રજતાભાવપ્રકારાદ્ભવેત્ ।
આરોપ્યાનુભવો યથા યદિ તથાધિષ્ઠાનસંવેદનં
  પૂર્વં બ્રહ્મ યદા મતં કથમસૌ સંસારરૂપો ભ્રમઃ ॥ ૪૫॥

તજ્જ્ઞાનેન વિના યદા કથમધિષ્ઠાનં ભ્રમો બોધયેત્
  બાધસ્તત્ર ન હિ પ્રભુઃ સ હિ સમારોપ્યસ્ય વિધ્વંસકઃ ।
નાત્મા ચેદ્વિદિતઃ ષડૂર્મિરહિતો દેહાદ્વિભિન્નો વિભુઃ
  નિત્યં કઃ કુરુતાં ધનક્ષયકરં દુઃખાકરં કર્મ તત્ ॥ ૪૬॥

અજ્ઞાત્વાક્ષરમત્ર યો હિ યજતે તસ્યાખિલં ક્ષીયતે
  શ્રુત્યૈવં પ્રતિપાદિતં ભગવતા ગીતાસુ તદ્વ્યાકૃતમ્ ।
જ્ઞાનં મોચકમત્ર બન્ધકમિદં કર્મેતિ કૈશ્ચિન્મતં
  તજ્જ્ઞાને ભગવન્મતે ન ઘટતે વૈદૈઃ સદા સમ્મતે ॥ ૪૭॥

બન્ધાર્થં ફલમેવ તત્પરિહૃતં કર્મૈવ ભક્ત્યાત્મના
  શ્રીકૃષ્ણાર્પિતમેકકં વિજયતે સંસારતો મુક્તયે ।
જ્ઞાનાનન્તરમીરિતં ભગવતઃ સંસેવનં ભૂરિભિઃ
  વાક્યૈર્મુક્તિફલાન્વિતૈઃ શ્રુતફલં નૈવાર્થવાદાયતે ॥ ૪૮॥

જ્ઞાનં પાપવિનાશનં યદિ ભવેત્તત્રાપિ મોક્ષશ્રુતિઃ
  સૈષાઙ્ગેષુ ફલશ્રુતિર્નયવશાદત્રાર્થવાદાયતે ।
જ્ઞાનઞ્ચેન્ન વિધીયતે તવ જના નૈતત્પ્રધાનં ભવેત્
  તસ્યાઙ્ગ કિમિહાસ્તુ યસ્ય ભવિતા ભાવ્યશ્રુતેર્વાદતા (?) ॥ ૪૯॥

ભતિર્જ્ઞાનમપેક્ષ્ય સાધયતિ તે દ્વારં વિમુક્તિં તદા (વિમુક્તેઃ)
  તસ્યાઃ કારણતા મતં શ્રવણતસ્તત્સ્યાદિતિ વ્યાહતમ્ ।
બ્રહ્માહં ન હિ મે ભિદા ભગવતા કાચિદ્યથાર્થા શ્રુતિઃ
  કૈવલ્યપ્રતિપાદિકા ભગવતી કિં ત્વેકમભ્યર્થયે ॥ ૫૦॥

યાવત્કાલભુપાધિરેષ કલિતો દેહાત્મના દૃશ્યતે

તાવત્કાલમહં ભજામિ સતતં ભક્તપ્રિયં શ્રીપ્રિયમ્ ।
પીતં પઙ્કજલોચનાક્ષિપુટકૈઃ પીતં દિલાસામ્બરે
રક્તં ગોપનિતમ્બિનીકુચતટે રક્તં વરોલ્લાસને ॥ ૫૧॥

શુક્લં કોમલમન્દહાસકુસુમે શુક્લં યુગોપક્રમે
કૃષ્ણં ચારુકલેવરે ગુણવરે કૃષ્ણં શ્રિયે સંશ્રયે ।
જાતિઃ કાચિદિહાસ્તુ કશ્ચન વિધિઃ પ્રાપ્તસ્તથૈવાશ્રમઃ
તદ્ધર્મસ્થિતિપાલનં ફલપરિત્યાગેન કૃષ્ણાર્પણમ્ ॥ ૫૨॥

જ્ઞાનં તસ્ય નિજાધિકારનિયમૈઃ સમ્પાદ્ય લક્ષ્મીપતેઃ
પાદામ્ભોરુહસેવનં હિ તનુતે લોકસ્ય નિઃશ્રેયસમ્ ।
સઞ્જાતે શ્રવણે તતઃ સમુદિતે જ્ઞાને પરાત્માશ્રયે
શુદ્ધેઽન્તઃકરણે નરસ્ય સુકૃતે જાત્યાશ્રમસ્થે કૃતે ॥ ૫૩॥

કામે નિર્ગલિતે મુકુન્દપદયોરાવિષ્કૃતાયાં રતૌ
સાકારસ્ય હરેરુપાસનમિદં સિદ્ધં શ્રુતૌ મુક્તયે ।
સત્યં જ્ઞાનમનન્તમેકમખિલં બ્રહ્મામૃતં નિશ્ચિતં
સર્વાત્મા પરમેશ્વરઃ સ સકલં સન્નિર્મમે માયયા ॥ ૫૪॥

નિર્માય સ્વયમેવ તત્ર કૃતવાન્ સ્વસ્ય પ્રવેશં પ્રભુઃ
તત્રોપાધિસમાવૃતસ્ય નિયતા ભક્તિર્ભવેદાત્મનઃ ।
જ્ઞાનાસૂત્રકૃતસ્તથોપનિષદાં વ્યાખ્યાકૃતઃ પણ્ડિતાઃ (નાનાસૂત્ર)
તત્રાપ્યુત્તમબુદ્ધયો મતકૃતઃ કેચિદ્વિવાદપ્રિયાઃ ॥ ૫૫॥

શ્રીકૃષ્ણસ્ય કલા ભવન્તુ ન સમાસ્તેનેતિ નિર્ધારિતં
તસ્માત્તન્મતબાધનં કથમિદં તેષાં મતેર્જાયતે ।
અવ્યક્તં સમુપાસ્યમિત્યુપહતવ્યક્તસ્ય સેવા શ્રુતા
સર્વાસૂપનિષત્સુ નિશ્ચિતમિદં કૃષ્ણેન ગીતામૃતૈઃ ॥ ૫૬॥

ભક્તેર્મુક્તિરિતીરિતં ભગવતા સારૂપ્યચિન્તાત્મિકા
સ્પષ્ટે રાજપથે સુખામૃતરસે ધીરા રમધ્વં સુખમ્ ।
હે ધીરાઃ કિમિહોદિતૈર્બહુતરૈશ્ચિત્તસ્ય ચિન્તાકરૈઃ
યુષ્માભિઃ સકલં શ્રુતિસ્મૃતિગતં વ્યાખ્યાશતં જ્ઞાયતે ॥ ૫૭॥

શાને શાસ્ત્રકૃતે કૃતં મતિમતામર્થાર્થમત્યાદરૈઃ
સર્વં તત્પરિમુચ્યતાં નિજકૃતે કૃષ્ણઃ પરં સેવ્યતામ્ ।
વાદૈર્ભક્તિરિયં ગતેતિ હૃદયં ભૂયસ્તરાં વેપતે

વિદ્વાંસો વિમલાશયાઃ પ્રતિભયાત્ સર્વં સ્વયં જાનતે ॥ ૫૮॥

નિતિ પરમેશ્વરેણ બહુધા ગીતાસુ સર્વ મતં
સ્પષ્ટં ભાગવતં (ભાગવતે) તથા નિગદિતં સ્વર્ગાપવર્ગપ્રદમ્ ।
એકં બ્રહ્મ યથાર્થમેતદખિલં તબ્ધ્યાકૃતં જૃમ્ભતે
સર્વે નિર્જરનાયકાશ્ચ તદિમે સર્વં જગત્તન્મયમ્ ॥ ૫૯॥

સર્વા મૂર્તિરિયં સ્ફુટા ભગવતો નારાયણસ્ય પ્રભોઃ
ચેતઃ કેવલમીહતે કલયિતું ગોપાલલીલં મહઃ
।? ? ?? ? ?॥

???????????? ॥ ૬૦॥

માયાસૈર્બહુભિર્વિવાદવિહિતૈઃ સિદ્ધાન્તચિન્તાભવૈઃ
માયામવ્યસનૈરલં શ્રુતિશિરસ્તત્ત્વં પરં ચિન્ત્યતામ્ ।
માયાવિભ્રમદાયિની મરકતશ્યામા મનોમોહિની
માયા કાચન માનસે મિલતુ મે માયૂરપિઞ્છપ્રિયા ॥ ૬૧॥

સેવા ભક્તિરપિ પ્રપત્તિરપરા તત્સંશ્રિતિઃ પ્રહ્વતા
તદ્ભક્તત્પરતા તદીયપરતોઽપાસ્તા શરણ્યા ગતિઃ ।
ઇત્યેકાર્થપદૈઃ શ્રુતિસ્મૃતિપુરાણાદ્યૈઃ સમુલ્લાસિતા ।
ભૂયાદ્વો ભવબન્ધભેદનકરી ભક્તિર્વિભોર્ભાસુરા ॥ ૬૨॥

યો ધ્યાતો વિમલેન્દ્રનીલરુચિરઃ કૃષ્ણેતિ સઙ્કીર્તિતઃ
સદ્યઃ ક્લેશચયં નિહત્ય વિતરત્યાનન્દબોધોદયમ્ ।
હે ધીરા બહુશાસ્ત્રતત્ત્વકલનાસંશુદ્ધબુદ્ધાશયાઃ
શ્રીકૃષ્ણે વિલસત્યુદારમહિમામ્ભોધૌ કથં ખિદ્યતે ॥ ૬૩॥

તલ્લીલાશ્રવણં શુભેન મનસા તન્નામસઙ્કીર્તનં
તન્મૂર્તિસ્મરણં ચ તત્પ્રતિકૃતેઃ પાદામ્બુજોપાસનમ્ ।
તત્પૂજા વિવિધા નમસ્કૃતિનુતિસ્તસ્મિંશ્ચ તદ્દાસતા
તત્સખ્યાત્મનિવેદનેન વિવિધા ભક્તિઃ શ્રુતા વૈષ્ણવી ॥ ૬૪॥

એષા ષોડશધેતિ કેઽપિ નવધા કેચિત્તથૈવાષ્ટધા
પ્રાહુઃ કેઽપિ તથૈકધેતિ મુનયો યસ્મિન્ન કશ્ચિદ્ગ્રહઃ ।
એકાગ્રેણ તદાશ્રિતેન મનસા તિષ્ઠન્ મુહુર્વૈષ્ણવઃ
સર્વં યુક્તમિદં કરોતિ પિબતસ્તૃપ્તિઃ સુધાયાં કથમ્ ॥ ૬૫॥

પીતં કર્ણપુટેન યાદવપતેશ્ચિત્રં ચરિત્રામૃતં
    ગીતં વૈણિકશેખરેણ મુનિના મત્યા (ભક્ત્યા) મહત્યા મુહુઃ ।
નીતં ભાવનયાનુરાગઘનયા સ્વસ્યાન્તરં સાન્તરં
    પીતં દુર્લભસૌરભોજ્જ્વલરસં તાપત્રયોન્મૂલનમ્ ॥ ૬૬॥

સ્વાદુ સ્વાદુરસાયનં શ્રવણયોઃ સન્તર્પણં ચેતસઃ
    કામાયાસપિપાસુતોપશમનં નિર્વાણમાશાક્ષુધામ્ ।
આલાનં ભ્રમતો મદેન બહુશઃ સઙ્કલ્પદુર્દન્તિનઃ
    સંસારજ્વરનાશનં ભગવતો વાર્તામૃતં પીયાતામ્ ॥ ૬૫॥

કેશિક્લેશન કંસસૂદન કૃપામ્ભોધે કલાનાં નિધે
    ક્રીડાકોલ કલાપચૂડ કમલાકાન્ત કમકીડન ।
કલ્કિન્ કેશવ કેશય ક્રતુપતે કઞ્જાક્ષ કમ્બુનિય
    ક્રોધાધીશ્વર કાલકાલ કલયે કલ્યાણદાં તે કથામ્ ॥ ૬૮॥

વિસ્ફોટપ્રતિમે દૃશૌ ભગવતો રૂપાવલોકં વિના
    હસ્તૌ તત્પરિચર્યયા વિરહિતૌ દુર્દગ્ધદર્વીસમૌ ।
તન્નામામૃતપાનરઙ્ગરહિતા જિહ્વા જલવ્યાલિકા
    પુચ્છં વૃશ્ચિકજં મનો હરિકથાહીનં નૃણામાન્તરમ્ ॥ ૬૯॥

નેત્રે પ્રેરય મે તવાકૃતિકૃતે કૌઁ કથાકર્ણને
    ઘ્રાણં પૂજિતમાલ્યગન્ધકલને પાદામ્બુશૈત્યે ત્વચમ્ ।
નૈવેદ્યાન્નરસાયનં રસયિતું જિહ્વાં મનઃ સન્તતં
    લીલાકલ્પિતરૂપચિન્તનવિધૌ ભક્તપ્રિય શ્રીપતે ॥ ૭૦॥

સખ્યં શ્રીપુરુષોત્તમેન કલયેત્ કો વા જનઃ પ્રાકૃતઃ
    તસ્યાભિન્નતયા પરપ્રિયતયા કિઞ્ચૈતદુજ્જૃમ્ભતે ।
પ્રેમાનન્દવિશૃઙ્ખલસ્ય મનસઃ કિં કિં ન સમ્ભાવ્યતે
    સત્યં તસ્ય પરેશિતુર્નિરવધિ પ્રેમાસ્પદં તત્પદમ્ ॥ ૭૧॥

ઇષ્ટં દત્તમિદં હુતં નિશમિતં દત્તં ચ તપ્તં ચ યત્
    ક્ષેત્રાપત્યકલત્રમિત્રભવનોદ્યાનાનિ યદ્યત્ પ્રિયમ્ ।
તત્સર્વં વિનિવેદયે ભગવતે કૃષ્ણાય હૃષ્ટાત્મના
    પ્રારબ્ધોપહૃતં વપુઃ પરમુપાસાર્થં પરસ્યાશ્રયન્ ॥ ૭૨॥

શ્રીકૃષ્ણાચ્યુત દેવ રામ નૃહરે જિષ્ણો હરે શ્રીપતે
    વિષ્ણો માધવ કેશવેશ્વર વિભો વિશ્વેશ વાણીપતે ।

ગોપાલાવ્યય ગોપ યાદવપતે ગોવિન્દ ગોપીપતે
નામૈકાવલિકા ગલે મિલતુ મે મોક્ષાય લક્ષ્મીપતેઃ ॥ ૭૩॥

મલ્લીકોરકમુગ્ધમાલ્યમહિતા મન્દારમૂલશ્રિતાઃ
માકન્દાઞ્ચિતમાધવીમધુઝરીમેદસ્વિમન્દસ્મિતાઃ ।
મન્દાન્દોલનમોદમાનમુરલીમાધુર્યમાદ્યજ્જનાઃ
મોદન્તાં મમ માનસે મધુપતેર્મુક્તિપ્રદા મૂર્તયઃ ॥ ૭૪॥

મન્દોદશ્ચિતહાસમુન્નતમુખં માકન્દમૂલસ્થિતં
મારોન્માદકરં મનોરમગુણં નાયૂરબર્હાઞ્ચિતમ્ ।
મન્દ્રાપૂરિતવંશિકામુખરિતં માલાસમાલાલિતં
માયામાનવવિગ્રહં મુરરિપું મોક્ષાય મન્યામહે ॥ ૭૫॥

કેકારાવકરમ્બિતે કુતુકિતાં કુઞ્જે કનરકેતકે
ક્રીડાક્લૃપ્તકદમ્બકોરકકુલાલઙ્કારકલ્લોલિનીમ્ ।
કાશત્કલ્પિતકાઞ્ચનારકુસુમાં કાર્તસ્વરાભાસ્વરાં
કૈવલ્યાક્રમકૌતુકાય કરુણાકાદમ્બિનીં કામયે ॥ ૭૬॥

માકન્દસ્ય મનોરમસ્ય મહિતે મૂલે મિલન્તં મુદા
મારોદશ્ચિતમન્દહાસમુખરં મલ્લીસ્રજા મણ્ડિતમ્ ।
મુગ્ધં મૌરલિકં મરાલગમનામુક્તાવલીમધ્યગં
માયામાણવકં મહોદયમહો માન્યં મહો મન્મહે ॥ ૭૭॥

વેદાન્તૈર્બહુધોદિતં બુધગણૈવૃન્દારકૈર્વન્દિતં
વૃન્દેન સ્ફુરિતં ગવાં વિદધતં બાલ્યોચિતાં વિક્રિયામ્ ।
વિશ્વસ્તં વ્રજયૌવતસ્ય વિલસદ્વક્રાલકં બાલકં
વિઘ્નો વૈણવિકં વિલાસવિવશં વૃન્દાવને વઞ્ચકમ્ ॥ ૭૮॥

ચાતુર્યાગમદેવતા પરિચિતા ચર્યાવતી ચામરૈઃ
ચામ્પેયસ્તબકાવતંસસુભગા ચર્યાવતી ચમ્પકૈઃ ।
ચન્દ્રાકારવિશોભમાનવદના ચૂડાવતી ચન્દ્રકૈઃ
ચર્ચા કાચન ચેતસિ સ્ફુરતુ મે ચર્ચાવતી ચન્દનૈઃ ॥ ૭૯॥

ચૂડાચુમ્બિતચારુચન્દ્રકચયં ચામીકરાભાસ્વરં
ચઞ્ચચ્ચન્દનસૌરભં ચટુતરં ચાતુર્યચર્યાચણમ્ ।
ચારીરઞ્જિતચાલ્યમાનચરણં ચામ્પેયમાલાધરં
ચેતશ્ચિન્તય ચઞ્ચલાપરિવૃતં ચર્ચાસુ ચન્દ્રાનનમ્ ॥ ૮૦॥

નિત્યોત્સારિતભેદવેદશિરસાં નીલોત્પલસ્થાસકં (સ્થાસકપદવાસઃ)
ગોપીનાં મૃગનાભિલેપરચનાવક્ષોજકુમ્ભાન્તરે ।
ભક્તાનાં પરિતાપશાન્તિવિધયે કલ્યાણકાદમ્બિની
જન્મારમ્ભફલં દૃશાં ચ જયતાત્ કાચિત્ કલા કૈશવી ॥ ૮૧॥

નાનારઙ્ગવશો નિરઞ્જનરસો નિઃશ્રેયસોદ્ભાવનો
નેત્રાનન્દકરો નવોદયવરો નીલોત્પલશ્રીધરઃ ।
નાદાસ્વાદપરો નવીનમદનો નન્દાત્મજો નાયકો
નિત્યં નોઽસ્તુ નિરન્તરં નયનયોર્નિત્યપ્રિયો નીલિમા ॥ ૮૨॥

કાલિન્દીકમનીયકૂલમિલિતં કસ્તૂરિકાકન્દલં
કન્દર્પોદયકાર્મણૈકવદનં કર્પૂરકુન્દસ્મિતમ્ ।
કૃષ્ણાચુમ્બિકદમ્બકુબ્જકુહરે કેલિક્રિયાકોમલં (કુઞ્જકુહરે)
કૃષ્ણાખ્યં કલયે કદા નુ કલયે કૌતૂહલં કેવલમ્ ॥ ૮૩॥

રાસોલ્લાસરસાયને ચ રસિકં રામાભિરારાધિતં
રાકાચન્દ્રસમાનનં રતિકરં રાજીવરાજેક્ષણમ્ ।
રક્તિમસ્તુતરઙ્ગરાગરચનં રક્તોલ્લસત્કુણ્ડલં
રક્તાશોકતરોરધો રસમયં રાધાસખં રાધયે ॥ ૮૪॥

ગત્વા શ્રીહરિમન્દિરં ભગવતો રૂપં વિલોક્યાદ્ભુતં
પ્રક્ષાલ્યાસ્ય ભવાદિવન્ધચરણં ગઙ્ગાદિતીર્થામ્બુભિઃ ।
માલાભૂષણગન્ધપીતવસનૈર્નોપહારક્રમૈઃ
ધન્યા એવ દિવાનિશં ભગવતઃ સેવાસુખં તન્વતે ॥ ૮૫॥

સર્વવ્યાપિકદમ્બમૂલમિલિતં લોકત્રયીપાલકં
ગોપાલં પરિપૂર્ણસંવિદમહો ગોપીજનૈર્વઞ્જિતમ્ ।
ઇન્દ્રાદીપ્સિતદાયકં બ્રજવધૂસન્તોષયાચ્યાપરં
કૌમારોપચિતં પુરાણપુરુષં બ્રહ્મ પ્રપદ્યે પરમ્ ॥ ૮૬॥

રાધાકિઙ્કરમીશ્વરં ત્રિજગતાં સર્વજ્ઞમજ્ઞં બજે
ચિન્તારત્નવિરાજમાનચરણં મુક્તાવિભૂષાઞ્જિતમ્ ।
પીયૂષાસ્પદલાલસં વિરચિતસ્તેયં પુનર્ગોરસે
સંસેવે મહિમાનમદ્ભુતગુણં નાનાગુણં નિર્ગુણમ્ ॥ ૮૭॥

કર્પૂ રૈઃ કુસુમૈર્મનોજ્ઞસુષમૈર્ધૂપૈઃ પ્રદીપોત્તમૈઃ

સૂપૈઃ સ્વાદુરસૈનર્વોદિતઘૃતાનૂપૈરપૂપૈઃ સદા ।
પૂજા શ્રીપુરુષોત્તમસ્ય વિભવો યદ્યસ્તિ વિસ્તાર્યતામ્ ।
નો ચેદસ્તિ જલં ફલં વનભવં દેવ્યાસ્તુલસ્યા દલમ્ ॥ ૮૮॥

ચઞ્ચચ્ચમ્પકસારસારસદલં નીલોત્પલપોલ્લસ-
ન્મલ્લીકેસરનાગકેસરલસત્પુન્નાગભાજા સ્રજા ।
મૂર્તિઃ શ્રીમધુસૂદનસ્ય મહિતા સુસ્થૈર્ગૃહસ્થૈર્યથા
વન્યૈઃ કાશકુશૈ રસાદપચિતૈર્દુઃસ્થૈર્દનસ્થૈસ્તથા ॥ ૮૯॥

ઉત્તાલૈઃ કલકાહલીકલકલૈર્મૂર્ચ્છન્મૃદઙ્ગારવૈઃ
ઘણ્ટાગોહ્કૃતિ ઘોષણૈર્બહુતરૈર્ભેરીરવાડમ્બરૈઃ । (ઘણ્ટૌઘૈઃ કૃત)
ગાનૈરુત્તમધાતુમાતુરચનૈઃ સંશુદ્ધગાનૈર્ધનૈઃ
સાટોપૈર્નટનૈર્દનૈર્મનોજ્ઞઘટનૈઃ પદ્માપતિં પ્રીણયે ॥ ૯૦॥

ગાનૈર્વૈણિકમાધુરીસમમિલત્તાનૈઃ સમાનૈઃ શુભૈઃ
વાદ્યૈઃ શ્રોત્રરસાયનીયમહસામાદ્યૈઃ સતોદ્યૈસ્તતૈઃ (તતાતોદ્યકૈઃ) ।
નૃત્યે રમ્યરસાનુરૂપઘટનાકૃત્યૈઃ સ્વભૃત્યૈઃ કૃતૈઃ
નવ્યૈઃ સ્તોત્રપદૈર્વચોમય ગવીગવ્યૈઃ સુભવ્યૈર્યજેત્ ॥ ૯૧॥ (ગવીગવ્યં - ગોક્ષીરમ્)

કસ્તૂરીસુરભીકૃતૈર્જલકણાસિક્તૈસસ્તુલસ્યા દલૈઃ
પન્નીરાગુરુસારચન્દ્રકણિકાસમ્મેલિતૈશ્ચન્દનૈઃ ।
ક્લૃપ્તોપાહૃતિ પૂજયન્ યદુપતિં દેવાસુરૈઃ પૂજિતે
તસ્મિન્નેવ મહોદયે સ્વસમયે તેજોમયે યુજ્યતે ॥ ૯૨॥

ઉત્ફુલ્લૈઃ કુસુમૈર્મનોજ્ઞસુષમૈ રત્નોપમૈઃ સદ્રુમૈઃ
કર્પૂરારચનૈરશેષમનસામાનન્દનૈશ્ચન્દનૈઃ ।
નાનાકારનિવેદનૈ રસઘનૈઃ પીયૂષકલ્પૈર્નવૈઃ
યેઽત્રાર્ચન્તિ રમાપતિં સવિભવાસ્તેષાં ભવોઽસમ્ભવઃ ॥ ૯૩॥

એષા ષોડશિભિસ્તથૈવ દશભિસ્તદ્વત્ પુનઃ પઞ્ચભિઃ
પૂજા શ્રીપુરુષોત્તમસ્ય રચિતા યેનોપચારૈઃ ક્રમાત્ ।
તસ્મિન્નેવ તનોતિ મુક્તિ મહિલા કામેન રાગોદયં
તસ્યાયુઃ કૃતકૃત્યભાવમયતે તસ્યૈવ જન્મોજ્જ્વલમ્ ॥ ૯૪॥

પારાવારશયં પરાવરમયં પારાયણં પાપિનાં
પુણ્યપ્રચ્યુતિપૂરકં પ્રભુવરં પાર્થપ્રિયં પૂર્વજમ્ ।
પુષ્પામોદપરિષ્કૃતં પુલકિતં પારિપ્લવં પાવનં

પ્રત્યુમં પ્રમદાશતૈઃ પ્રમુદિતં પ્રાણાધિકં પૂજયે ॥ ૯૫॥

રોમાઞ્જૈઃ સમુદઞ્ચિતૈશ્ચુલુકિતં બિભ્રદ્વપુઃ સુન્દરં
નેત્રે હર્ષજલોજ્જ્વલે વિકસિતસ્મેરારવિન્દશ્રિણી ।
ચેતઃ પ્રેમપરિપ્લુતં ભગવતો લીલાપ્રવીણૈર્ગુણૈઃ
યઃ સ્તૌતિ પ્રતિવાસરં મુરહરં મુક્ત્યૈ સ શક્તઃ પરમ્ ॥ ૯૬॥

સંસારજ્વરચન્દનૈઃ સુમનસામાનન્દનૈર્વન્દનૈઃ
આનન્દાદતિ નન્દનન્દનમમું વન્દેતયસ્સુન્દરૈઃ ।
તદ્ વૃન્દારકવન્દિતં પદમિદં ધિક્કૃત્ય પૌરન્દરં
વિન્દત્યવ્યયસંવિદં સ પરમાનન્દાદ્વિતીયં મહઃ ॥ ૯૭॥

યોગી તં તનુતે પુરો મુરરિપોર્નામામૃતૈરાયતૈઃ
યોગીન્દ્રઃ શ્રુતિશાસને સુષમતો મોહોલ્લસન્માનસઃ ।
ભોગીશસ્ફુટતલ્પકલ્પનમમું સેવેત યઃ કેશવં
ભોગીશઃ સ પુમાન્ સ એવ ચતુરો ભુક્તેશ્ચ મુક્તેઃ ક્ષમઃ ॥ ૯૮॥

કાલોલ્લાસિકદમ્બકોરકકુલે કાર્પૂરિતે કેતકૈઃ
કેલીકુઞ્જકુટીરકે કલકલૈઃ કલ્લોલિતે કેકિનામ્ ।
ક્લિષ્ટાનાં કમનીયકાન્તિસુષમઃ કસ્તૂરિકાકોમલઃ
કલ્યાણાનિ કરોતુ કૌતુકમયઃ ક્લૃતોદયઃ કાલિમા ॥ ૯૯॥

મૌલૌ નીલમણિચ્છટા મૃગદૃશાં નીલોત્પલં કર્ણયોઃ
ચક્ષુષ્યઞ્જનરઞ્જનં કુચયુગે કસ્તૂરિકાલેપનમ્ ।
નીલં નેત્રદલં નિતમ્બફલકે પાદામ્બુજે ષટ્પદં (નેત્રમ્-જટા વસ્ત્રાઞ્ચલં ચ)
સર્વસ્વં શ્રુતિશેખરસ્ય કલયે વૃન્દાવને વ્યાકૃતમ્ ॥ ૧૦૦॥

મુગ્ધેન્દીવરમાલિકાવિરચનં વૃન્દાવનક્ષ્મારુહા-
મામોદાય ગવાં નવામ્બુદસમં સારં તમાલાઙ્કુરમ્ ।
માદ્યન્મન્મથમાનયૌવનમદાઘૂર્ણભ્રુવાં સુભ્રુવા-
માસ્વાદ્યં મહયે મહો મહદહો માધુર્યમૂલાયનમ્ ॥ ૧૦૧॥

દિક્પાલાવલિમૌલિરઞ્જિતપદામ્ભોજં ત્રિલોકેશ્વરં
ગોપસ્ત્રીજનવસ્ત્રમોષણકલાપરીણપાટચ્ચરમ્ ।
લક્ષ્મીકલ્પિતદિવ્યતલ્પવિલસત્પર્યઙ્કુપર્યાકુલં
કાલિન્દીતટસૈકતીયશયને સ્વેચ્છાસુષુમં શ્રયે ॥ ૧૦૨॥

યદ્દણ્ડગ્રહણં કષાયવસનાદાનં શિરોમુણ્ડનં
    ભક્તિં ભાગવતીં વિના હતમતેઃ તત્કેવલં દણ્ડનમ્ ।
કૃષ્ણાને યદિ દણ્ડવન્નિપતનં તદ્યાતનાં દણ્ડયેત્
    યાતાયાતકૃતાં ભવેત્ (ભવે) પરિભવે તત્સમ્ભવેન્મણ્ડનમ્ ॥ ૧૦૩॥

દણ્ડેનૈકતરેણ કિં ગુરુતરૈર્દણ્ડૈસ્ત્રિભિઃ કિં કૃતં
    દીર્ઘશ્મશ્રુભવૈર્જટાયતજટાભારૈરપારૈરલમ્ ।
કેશક્લેશનવેષ એષ ભગવદ્ભક્તિં વિના સજ્જનાઃ
    શ્રીનારાયણમાશ્રયધ્વમિહ વો મુક્તૌ યદા કામના ॥ ૧૦૪॥

નૈવેદ્યૌદનભોજનં ભગવતો નિર્માલ્યમાલ્યોત્તમૈઃ
    ભૂષા તચ્ચરણાબ્જકુઙ્કુમકણૈર્ફાલસ્થલોદ્ધૂલનમ્ ।
તન્મુક્તામ્બરડમ્બરૈરનુપમૈરુષ્ણીષસંવેષ્ટનં
    ભૂયાસુર્મમ મુક્તયે મુનિમતાઃ સેવાભિષેકોત્સવાઃ ॥ ૧૦૫॥

નૈવેદ્યં પુરુપોત્તમસ્ય સુરસં પીયૂષસારોપમં
    સામોદૈસ્તુલસીદલૈઃ પરિચિતં સર્વાઘગર્વાપહમ્ ।
કર્પૂરોત્કરસૌરભં શુભતરં ચક્ષુર્મનોરઞ્જનં
    ભુઞ્જાનો ભવરઞ્જનં કલયતે વિષ્ણોઃ પદં કેવલમ્ ॥ ૧૦૬॥

દાસ્યાય ક્ષણિકાયુષાં પ્રભવતે દેવાવલીસમ્પદાં
    નૈરાશ્યાય ફલેષુ દર્શિતમહાલોભેષુ ભોગેચ્છયા ।
લાસ્યાય પ્રિયસમ્પદાં વિદધતે વિખ્યાતમાચાર્યકં
    દાસ્યાય સ્પૃહયામહે ભગવતો મોક્ષૈકદીક્ષાગુરોઃ ॥ ૧૦૭॥

નિત્યં કર્મકરૌ કરૌ શુચિતરૌ સેવાકથાતત્પરૌ
    પાદૌ સુન્દરમન્દિરાગમસુસંવાદૌ સદાર્દ્રે કૃતૌ ।
ઘ્રાણં મૌલિવિમુક્તમુગ્ધતુલસીઘ્રાણે કૃતપ્રીણને
    વિદ્વત્તા કવિતા વિચિત્રચરિતે કૃષ્ણસ્ય મે નન્દતામ્ ॥ ૧૦૮॥

જારત્વં ગુરુતલ્પદોષશમનં ગોપીષુ યસ્ય પ્રભોઃ
    સદ્યો બ્રહ્મવધં ધુનોતિ બહુધા યદ્બ્રહ્મરક્ષોવધઃ ।
સ્ત્રીભિઃ શીધુનિષેવણં ગુરુસુધાપાનં ક્ષિણોતિ ક્ષણાત્ (ગુરુસુરાપાનં)
    સ્તેયં ગોરસમોષણં શતમહો તત્સઙ્ગમઃ સઙ્ગમઃ ॥ ૧૦૯॥

વેદાન્તૈર્બહુધાવૃતં શ્રુતિશતૈઃ સઙ્ઘાકૃતં શ્રીકૃતં
    સિદ્ધાન્તૈરુરરીકૃતં મુનિવરૈઃ સર્વૈઃ પુરાણૈર્વૃતમ્ ।

ચિત્ત સ્વાસ્થ્યહૃતં હરેણ વિવૃતં મોક્ષાર્થમત્યાદૃતં (ચિત્તા)
શ્રીકૃષ્ણસ્ય નિપીયતાં રસભૃતં શ્રોત્રેણ નામામૃતમ્ ॥ ૧૧૦॥

લીલાસંશ્રવણે હરોઽતિરસિકઃ શ્રીનારદઃ કીર્તને
બ્રહ્મા સંસ્મરણે પદામ્બુરુહયોઃ સંસેવને પદ્મજા ।
પૂજાયાં સુરનાયકઃ સ્તુતિવિધૌ વ્યાસો ગરુત્માન્ પુનઃ
દાસ્યે સખ્યકૃતે નરોઽપ્યતિરતઃ સ્વાત્માર્પણે શ્રીપતેઃ ॥ ૧૧૧॥

એકોઽપિ ત્રિગુણાનુબિમ્બકલયા ત્રૈવિધ્યમાભાસયન્
માયાકલ્પલતાશ્રયઃ શુકમુખૈઃ સંસેવિતો યો દ્વિજૈઃ ।
આયાસૈરફલૈરલં કૃતધિયઃ સોઽયં પરં સેવ્યતાં
નીલક્ષ્માધરમૌલિમણ્ડનમણિઃ કૈવલ્યકલ્પદ્રુમઃ ॥ ૧૧૨॥

દેવશ્રેણિકિરીટપઙ્કજવિસંવાદેન પાદેન ત-
દ્વેદોદીરિતચિત્પ્રકાશપરમાહ્લાદેન નાદેન તત્ ।
સિદ્ધં ચેદખિલં મનોજ્ઞમુરલીનાદેન માદેન નો
વાગાડમ્બરજૃમ્ભમાણકલહોન્માદેન વાદેન કિમ્ ॥ ૧૧૩॥

ઇત્યેષા પુરુષોત્તમસ્ય કથિતા ભક્તિર્વિમુક્તિપ્રદા
નાસ્યાં વાદકથા તથા મતિમતાં કલ્યાણિની શોભતે ।
સાકારસ્ય હરેરુપાસનમિદં નાકારસમ્મેલનં
પુંસઃ સન્તનુતે તનોતિ પરમબ્રહ્મામૃતં કેવલમ્ ॥ ૧૧૪॥

કો મૂઢઃ સુપથે સ્થિતેઽપિ ચતુરૈર્વિદ્વજ્જનૈઃસંશ્રિતે
નાનોપદ્રવવર્જિતે સ્વસુકૃતૈરાવર્તિતૈરર્જિતે ।
યૈઃ કૈશ્ચિત્ કૃપણૈઃ કૃતં પરિહતં વિજ્ઞૈઃ કદર્થીકૃતં
કર્તું દુષ્કરમુગ્રદુઃખવિકટં દુષ્ટં દુરધ્વં શ્રયેત્ ॥ ૧૧૫॥

હે સૌમત્ય જિતં ત્વયા ભગવતા પાણ્ડિત્યકૃત્યં કૃતં
વાદિત્વપ્રતિપાદિતં તદશુભં તત્ત્વે કવિત્વસ્થિતમ (?) ।
માર્ગાન્ દુર્ગમકણ્ટકાતિવિકટાન ભૂયઃ કૃતાધોગતીન્
યન્મુક્ત્વા હરિરાશ્રિતઃ સુમનસાં સ્વર્ગાપવર્ગપ્રદઃ ॥ ૧૧૬॥

શ્રીજીવઃ કવિડિણ્ડિમો નૃપગુરુઃ ષડ્દર્શિનીપણ્ડિતો
ભક્તિપ્રસ્થિતદેશિકોઽખિલકલાલઙ્કારરત્નાકરઃ ।
વિંશત્યૂર્ધ્વપ્રશતીમિતૈર્વ્યરચયત્ પદ્યૈઃ ક્રમાદ્ગુમ્ભિતૈઃ
શ્રીકૃષ્ણસ્ય સમર્ચનાવિધિકૃતે શ્રીવૈજયન્તી શુભામ્ ॥ ૧૧૭॥

શ્રીનીલાચલવાસિનો ભગવતો મોકચિન્તામણેઃ
    લીલાવિગ્રહશાલિનઃ શ્રુતિશિરોરાજિષ્ણુચૂડામણેઃ ।
શ્રીમજીવકવીશ્વરેણ ચરણામ્ભોજાતયોરર્પિતા
    સમ્મૃષ્ટા ગુણશાલિની વિજયતાં શ્રીવૈજયન્તી ચિરમ્ ॥ ૧૧૮॥

ઇતિ શ્રીમત્કવિરાજરાજગુરુત્રિલોચનાચાર્યતનય શ્રીમદ્ભક્તિપ્રસ્થાનપ્રણયનાભિનવ બાદરાયણ શ્રીનારાયણચરણપરાયણકવિડિણ્ડિમવાહિનીપતિ ગજરાજરાજગુરુ શ્રીજીવદેવાચાર્યવિરચિતં ભક્તિવૈજયન્તીસ્તોત્રં સમ્પૂર્ણમ્ ।

Proofread by Gopalakrishnan

---

*Shri Bhaktivaijayanti Stotram*

pdf was typeset on June 28, 2023

Please send corrections to *sanskrit@cheerful.com*